# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – पुराणेतिहासः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – विष्णुपुराणम्** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत ।**

१ ॐ पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥

२ नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमोज्योतिरभूच्च नान्यत् ।
श्रोत्रादिबद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् ॥

३ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
भूतादिरादिप्रकृतिर्यस्य रूपं नतोऽस्मि तम् ॥

४ पारं परं विष्णुरपारपारः परः परेभ्यः परमार्थरूपी ।
स ब्रह्मपारः परपारभूतः परः पराणामपि पारपारः ॥

**प्रश्नः** २ चातुर्वर्ण्यव्यवस्थां वर्णयत ।

**प्रश्नः** ३ ध्रुवचरितं वर्णयत ।

**प्रश्नः** ४ प्रह्लादचरितं लिखत ।

**प्रश्नः** ५ भूगोलवर्णनं कुरुत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ कर्ता क्रियाणां स च इज्यते क्रतुः स एव तत्कर्मफलं च तस्य ।
स्रुगादि यत्साधनमप्यशेषं हरेर्न किञ्चिद्व्यतिरिक्तमस्ति ॥

२ काष्ठा निमेषा दश पञ्च चैव त्रिंशच्च काष्ठा गणयेत्कलां च ।
त्रिंशत्कलश्चैव भवेन्मुहूर्तस्तैस्त्रिंशता रात्र्यहनी समेते ॥

३ मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः ।
जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥
४ एकः समस्तं यदिहास्ति किञ्चित्तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ॥

**प्रश्नः ७** ऊर्ध्वलोकानां वर्णनं कुरुत ।

**प्रश्नः ८** भरतचरित्रं लिखत ।

**प्रश्नः ९** ऋग्वेदीयशाखानां विस्तृतं वर्णनं कुरुत ।

**प्रश्नः १०** यमगीतां वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ पुराणलक्षणं किम् ?
२ महापुराणलक्षणं किम् ?
३ व्यासस्य पितुः नाम किम् ?
४ विष्णुपुराणे कति श्लोकाः ?
५ विष्णुपुराणे कति अंशाः ?
६ कति तत्त्वानि ?
७ कति वर्णाः ?
८ पुराणस्य मङ्गलाचरणात्मकः श्लोकः कः ?
९ कस्य शापात् इन्द्रः पराजितः ?
१० पृथोः पितुः नाम किम् ?
११ भूगोलवर्णनं कस्मिन् अंशे वर्तते ?
१२ यमगीता कस्मिन् अंशे वर्तते ?
१३ प्रह्लादस्य मातुः नाम किम् ?
१४ ध्रुवः कति श्लोकैः स्तुतिं करोति ?
१५ ध्रुवः पूर्वजन्मनि कः आसीत् ?

****